# Devaih Kritam 22 Shiva Stotram

# દેવૈઃ કૃતં ૨૨ શિવસ્તોત્રમ્

## Document Information

Text title : Devaih Kritam 22 Shiva Stotram

File name : devaiHkRRitaM22shivastotram.itx

Category : shiva, skandapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | nAgarakhaNDa | adhyAya 1/37-48||

Latest update : July 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 6, 2025

*sanskritdocuments.org*

Devaih Kritam 22 Shiva Stotram

# દેવૈઃ કૃતં ૨૨ શિવસ્તોત્રમ્

દેવા ઊચુઃ ।
નમસ્તે દેવદેવેશ ભક્તાનામભયપ્રદ ।
નમસ્તે જગદાધાર શશિરાજિતશેખર ॥ ૧.૩૭॥

ત્વં યજ્ઞસ્ત્વં વષટ્કારસ્ત્વમાપસ્ત્વં મહી વિભો ।
ત્વયા સૃષ્ટમિદં સર્વં ત્રૈલોક્યં સચરાચરમ્ ॥ ૧.૩૮॥

ત્વં પાસિ ચ સુરશ્રેષ્ઠ તથા નાશં નયિષ્યસિ ।
ત્વં વિષ્ણુસ્ત્વં ચતુર્વક્ત્રસ્ત્વં ચન્દ્રસ્ત્વં દિવાકરઃ ॥ ૧.૩૯॥

ત્વયા વિના મહાદેવ ન કિઞ્ચિદિહ વિદ્યતે ।
અપિ કૃત્વા મહત્પાપં નરો દેવ ધરાતલે ॥ ૧.૪૦॥

તવ નામાપિ સઙ્કીર્ત્ય પ્રયાતિ ત્રિદિવાલયમ્ ।
મહાદેવ મહાદેવ મહાદેવેતિ કીર્તનાત્ ॥ ૧.૪૧॥

કોટયો બ્રહ્મહત્યાનામગમ્યાગમકોટયઃ ।
સદ્યઃ પ્રલયમાયાન્તિ મહાદેવેતિ કીર્તનાત્ ॥ ૧.૪૨॥

વિપ્રો યથા મનુષ્યાણાં નદીનાં વા મહાર્ણવઃ ।
તથા ત્વં સર્વદેવાનામાધિપત્યે વ્યવસ્થિતઃ ॥ ૧.૪૩॥

નક્ષત્રાણાં યથા ચન્દ્રઃ પ્રદીપ્તાનાં દિવાકરઃ ।
તથા ત્વં સર્વદેવાનામાધિપત્યે વ્યવસ્થિતઃ ॥ ૧.૪૪॥

ધાતૂનાં કાઞ્ચનં યદ્વદ્ગન્ધર્વાણાં ચ નારદઃ ।
તથા ત્વં સર્વદેવાનામાધિપત્યે વ્યવસ્થિતઃ ॥ ૧.૪૫॥

ઓષધીનાં યથા સસ્યં નગાનાં હેમપર્વતઃ ।
તથા ત્વં સર્વદેવાનામાધિપત્યે વ્યવસ્થિતઃ ॥ ૧.૪૬॥

તસ્માત્કુરુ પ્રસાદં નઃ સર્વેષાં ચ નૃણાં વિભો ।

સન્ધારય પુનર્લિઙ્ગં સ્વકીયં સુરસત્તમ ॥ ૧.૪૭॥

નોચેજ્જગત્ત્રયં દેવ નૂનં નાશમમુપેષ્યતિ ।
યદ્યેતદ્ભૂતલે લિઙ્ગં પતતિ સ્થાસ્યતિ પ્રભો ॥ ૧.૪૮॥

ઇતિ શ્રીસ્કન્દપુરાણે નાગરખણ્ડે પ્રથમાધ્યાયાન્તર્ગતં
દેવૈઃ કૃતં શિવસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । નાગરખણ્ડ । અધ્યાય ૧/૩૭-૪૮॥

skandapurANa . nAgarakhaNDa . adhyAya 1/37-48..

Proofread by PSA Easwaran

---

*Devaih Kritam 22 Shiva Stotram*

pdf was typeset on July 6, 2025

Please send corrections to *sanskrit@cheerful.com*